2026

MASVSC203

निरुक्तं पाणिनीयशिक्षा च

Full Marks : 80

Time : 3 Hours

(The figures in the margin indicate full marks for the questions)

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् - **1×10=10**

1. नैगमकाण्डं कुत्र वर्तते?
2. आदिवर्णलोपस्य उदाहरणं किम्?
3. गौः इत्यस्य निर्वचनं किम्?
4. हिरण्यम् इत्यस्य निर्वचनं किम्?
5. इन्द्रस्य स्थानं किम्?
6. सूर्यस्य सवनं किम्?
7. पाणिनीयशिक्षानुसारं शम्भुमते कति वर्णाः सन्ति ?
8. "श"कारस्य उच्चारणस्थानं किम् ?
9. पाणिनीयशिक्षानुसारं कस्य प्राणिनः ध्वनिः एकमात्रिकः?
10. निरुक्तानुसारं कति देवताः?

अधोलिखितानां केषाञ्चित् पञ्चानां यथानिर्देशं समाधेयम् – **6×5=30**

11. उपधालोपः – टिप्पणी प्रदेया ।
12. समुद्रः – टिप्पणी प्रदेया ।
13. अथैतानि इन्द्रभक्तीनि - व्याख्यायताम् ।
14. आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
    मनः कायाग्निमाहन्ति सः प्रेरयति मारुतम् ॥ – व्याख्यायताम् ।
15. माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
    धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ – व्याख्यायताम् ।
16. तास्त्रिविधा ऋचः । – व्याख्यायताम् ।
17. शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
    तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ – व्याख्यायताम् ।

अधस्तनेषु प्रश्नचतुष्टयं समाधेयम् – **10×4=40**

18. निरुक्तवेदाङ्गस्य महत्त्वं प्रतिपाद्यताम्।
19. 'गौरिति पृथिव्याः नामधेयम् 'सन्दर्भोऽयं विशदीक्रियताम्।
20. 'तिस्र एव देवता इति नैरुक्ताः'- सन्दर्भोऽयं विशदीक्रियताम् ।
21. शिक्षावेदाङ्गमधिकृत्य प्रबन्धरेको विरच्यताम्।
22. पाणिनीयशिक्षानुसारं वर्णभेदाः विवर्ण्यताम् ।
23. निरुक्तस्य द्वितीयोऽध्यायस्य सारांशः प्रस्तूयताम् ।

****